Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 1 | ISSN : 2581- 6306

# वेदार्थप्रतिपत्तये पाणिनीयव्याकरणदृष्ट्या स्वराणां विवेचनम्

*डॉ॰ विदुषी बोल्ला
सहायकाचार्य्या, व्याकरणविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातम्

**Article Info**

**Publication Issue :**
January-February-2023
Volume 6, Issue 1
**Page Number :** 01-07
**Article History**
Received : 01 Jan 2023
Published : 09 Jan 2023

**पस्पशा** –अस्मिन् जगति यावन्तो हि व्यवहारास्ते शब्दाधीनाः। शब्दानाञ्च स्वात्मरक्षा व्याकरणाधीना। अत एव शास्त्रमिदं शब्दानुशासनमित्यनर्थान्तरं लभते। तत्र अनुशासितव्याः कतमाः शब्दाः इति प्रतिभावतां चेतसि प्रश्नः समुदेति। जिज्ञासेयं शमयन्तो भगवन्तो महाभाष्यकृतः[1] ऊचुः – लौकिकानां वैदिकानाञ्च। तत्र लौकिकास्तावत् गौः, अश्वः, पुरुषः हस्ती, शकुनिः, मृगः, ब्राह्मणः इति। वैदिकाः खल्वपि – शन्नो देवीरभिष्टये, इषे त्वोर्जे त्वा, अग्निमीळे पुरोहितम्, अग्न आ याहि वीतय इति। ईदृच्छब्दराशित्वेनोपलभ्यमानस्य वेदस्य व्याकरणेन सम्बन्धः इत्यत्र नास्ति लेशतोऽपि सन्देहो भाषातत्त्वविदां विचक्षणानाम्। तत्रापि स्वेच्छानुसारेण वेदार्थप्रतिपत्तिं निवारयितुं ऋषभिः केचन उपायाः प्रकल्पिताः – ते स्वराः (उदात्तानुदात्तस्वरिताश्च), अष्टविकृतयश्च (जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः॥ इति)। शोधपत्त्रेऽस्मिन् पाणिनीयव्याकरणदृष्ट्या स्वरविषयकान् काञ्चनांऽशान् प्रतिपिपादयिषामि। विषयस्य विमर्षणीयाः अंशास्तावत्

**सङ्केतशब्दाः** – स्वरपदार्थतः, स्वरः, स्वरभेदाः, पाणिनीयव्याकरणम्, स्वरविधानम्, स्वराणां प्रयोजनम्, समासार्थबोधः, पदार्थबोधः, वाक्यार्थबोधः, अदृष्टसिद्धिः, उदात्तः, अनुदात्तः, स्वरितः, एकश्रुतिश्च।

1. **स्वरपदार्थः कः?**
2. **स्वरभेदाः के?**
3. **पाणिनीयव्याकरणे स्वरविधानम्।**
4. **स्वराणां प्रयोजनम्**
    - 4.1 पदार्थबोधः
    - 4.2 समासार्थबोधः
    - 4.3 वाक्यार्थबोधः
    - 4.5 अदृष्टसिद्धिः
5. **उपसंहारः।**

**1. स्वरपदार्थः कः?** – 'स्वृ शब्दोपतापयोः'[2] इति धातोः 'पुंसि सञ्ज्ञायां घः प्रायेण'[3] इति सूत्रेण घप्रत्यये सति स्वरपदं निष्पद्यते। अत एव अमरकोषे स्वर्यन्तेऽर्था एभिः इति स्वराः इत्युक्तम्। तथा च प्रकृतधातोः एव घञ्प्रत्यये[4] च कृते स्वारः इति शब्दोऽपि सिद्ध्यति। उभयोः अर्थस्तु समान एव।

**2. स्वरभेदाः के?** – शास्त्रेषु स्वरभेदानां विषये बहवः मताः प्रोक्ताः। यथा –

[1] महाभाष्ये पृ॰स॰ - 02

[2] धातुपाठे पृ॰स॰ - 20

[3] अष्टाध्याय्याम् 3-3-118

[4] भावे (3-3-18) इत्यनेन सूत्रेण सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्प्रत्ययो भवति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

❖ महाभाष्ये सप्त स्वराणां प्रतिपादनं विद्यते। ते च उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तः सोऽन्येन विशिष्टः, एकश्रुतिश्च।

❖ वाजसनेयिप्रातिशाख्येऽपि सप्तस्वराः प्रतिपादिताः। ते च जात्यः, अभिनिहितः, क्षैप्रः, प्रश्लिष्टः, तैरोव्यञ्जनः, तैरोविरामः, पादवृत्तश्च।

❖ नारदशिक्षायां पञ्च स्वराः उद्धृताः सन्ति –

उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा।
निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा॥ इति।

उदात्तः, अनुदात्तः, स्वरितः, प्रचितः, निघातश्चेति पञ्च स्वराः भवन्ति।

❖ तैत्तिरीयप्रातिशाख्ये उदात्तः, अनुदात्तः, स्वरितः, प्रचयश्चेति चत्वारः एव स्वराः सन्ति।

❖ पाणिनीयशिक्षायामपि चत्वारः एव भवन्ति - उदात्तः, अनुदात्तः, स्वरितः, प्रचयश्चेति।

❖ वेदसंहितासु उदात्तः, अनुदात्तः, स्वरितश्चेति त्रयः स्वराः दृश्यन्ते।

एषु बहुविधस्वरेषु उदात्तानुदात्तस्वरिताश्चैव प्रधानाः। एतेषामेव विवृतिः पत्रेऽस्मिन् प्रदर्श्यते।

**3. पाणिनीयव्याकरणे स्वरविधानम् –** सर्वेष्वपि व्याकरणेषु ख्यातिलब्धं सर्वाङ्गपूर्णं व्याकरणशास्त्रं विद्यते – पाणिनीयम्। भगवत्पादैः अष्टाध्याय्यां सर्वत्र प्रकीर्णानां स्वरसूत्राणां श्रीमद्भट्टोजिदीक्षितैः एतान् विशिष्टक्रमे विभज्य एकस्मिन्नेव स्थले वैयाकरणसिद्धान्तकौमुद्याम् अध्यायशः विषयानुगुणञ्च व्याख्यायि। अत्र एतान्येव स्वरसूत्राणि सङ्क्षेपेण उपस्थाप्यन्ते विवेच्यन्ते च। तत्र सर्वादौ अध्यायशः प्रथमाध्यायादारभ्य अष्टमाध्यायपर्य्यन्तं तत्तदध्याये आगतानां सूत्राणां विभागः दरीदृश्यते। अनन्तरं सामान्यतया सन्दर्भानुगुणं विषयानुगुणञ्च सूत्रान् विभज्य प्रकरणानि कल्पितानि सन्ति।

वैयाकरणसिद्धान्तकौमुद्यां प्रकरणं विद्यते साधारणस्वरप्रकरणमिति। साधारणतया येषां स्वराणां विधानं भवति, ते अत्र निरूपिताः वर्त्तन्ते। अनन्तरं द्वितीयप्रकरणमस्ति धातुस्वराणाम्। ये स्वराः धातुमभिलक्ष्य प्रवर्त्तन्ते, तेषां विधायकसूत्राणि प्रकरणेऽस्मिन् सङ्कलितानि सन्ति। अत्र सर्वाण्यपि सूत्राणि उदात्तस्वरविषयकाण्येव वर्त्तन्ते। तृतीयप्रकरणं वर्त्तते प्रातिपदिकस्वराणाम्। अस्मिन् प्रकरणेऽपि प्रायः उदात्तविधायकान्येव सूत्राणि सन्ति। अष्टाध्याय्याः सूत्राणि विहाय सूत्रान्तराण्यपि प्रातिपदिकमुद्दिश्य स्वराणां विधानं कुर्वन्ति, तानि सन्ति – फिट्सूत्राणि। अत्र फिष् अर्थात् प्राचां मते प्रातिपदिकमिति। अनन्तरं समासस्वरप्रकरणमायाति। अत्रस्थान्यपि सूत्राणि उदात्तविषयकाण्येव सन्ति। एवमस्माभिः दृष्टं यत् – धातुप्रातिपदिकसमासप्रकरणेषु प्रायः उदात्तविधायकान्येव सूत्राणि वर्त्तन्ते। अन्तिमप्रकरणं वर्त्तते – तिङन्तप्रकरणम्। अत्र प्रायः अनुदात्तविधायसूत्राणि एव आगच्छन्ति। एवमेषा व्यवस्था पाणिनीयव्याकरणानुसारिणी वर्त्तते।

अत्र प्रथमसूत्रमस्ति – 'अनुदात्तं पदमेकवर्जम्'[5] इति। अस्यार्थो भवति – यस्मिन् पदे यस्य एकस्य अचः उदात्तः स्वरितो वा विधीयते, तमेकम् अचं वर्जयित्वा शेषं तत्पदम् अनुदात्ताच्कम् अर्थात् अनुदात्तस्वरयुक्तं भवति। यथा गोपायतं नः। 'गुपू रक्षणे'[6] इति धातोः 'गुपुधूपविच्छिपणिपनिभ्य आयः'[7] इत्यनेन आयप्रत्ययः, अत्र 'धातोः'[8] इत्यनेन अन्तोदात्वम् अर्थात् गकारोत्तरवर्त्युकारः उदात्तो भवति। अनन्तरम् 'आद्युदात्तश्च'[9] इत्यनेन सूत्रेण आद्युदात्त्वम् अर्थात् आकारः उदात्तो भवति। ततः 'सार्वधातुकार्धधातुकयोः'[10] इत्यनेन सूत्रेण गुणे कृते गोपाय इत्यवस्थायां, पुनः 'सनाद्यन्ता धातवः'[11] इत्यनेन धातुसञ्ज्ञा विधीयते, अनन्तरं 'धातोः' इत्यनेन अन्तोदात्वम् अर्थात् यकारोत्तरवर्त्त्यकारः उदात्तो भवति। अत्र 'सतिशिष्टस्वरबलीयस्त्वमन्यत्र

---

[5] अष्टाध्याय्याम् 6-1-158

[6] धातुपाठे भ्वादिगणस्य 686 तमः धातुः।

[7] अष्टाध्याय्याम् 3-1-28

[8] तत्रैव, 6-1-162

[9] तत्रैव, 3-1-3

[10] तत्रैव, 7-3-84

[11] तत्रैव, 3-1-32

विकरणेभ्यः' (वार्त्तिकम् - 3730)[12] इति परिभाषया शिष्टस्वरः अर्थात् पश्चाद्विधीयमानस्वरः उदात्तः बलीयो भवति। अत एव गोपाय इत्यत्र एकः एव अनन्तरं विहितस्वरः यकारोत्तरवर्त्यकारः उदात्तः भवति। इदानीं 'कर्त्तरि शप्'[13] इत्यनेन कर्त्तर्यर्थे शप्प्रत्ययः, शप्प्रत्ययस्य पित्वात् 'अनुदात्तौ सुप्पितौ'[14] इत्यनेन सूत्रेण शपः अकारस्य अनुदात्तो विधीयते। 'गोपाय अ' इत्यवस्थायाम् 'अतो गुणे'[15] इत्यनेन पररूपे प्राप्ते 'एकादेश उदात्तेनोदात्तः'[16] इत्यनेन उदात्तेन सह एकादेशे सति उदात्तः एव तिष्ठति। अत्र यकारोत्तरवर्त्यकारः उदात्तः, शपः अकारः अनुदात्तश्चासीत्, पररूपैकादेशे सति उदात्तः एव शिष्यते। इदानीं थस्प्रत्यये सति 'गोपाय थस्' इत्यत्र 'तस्थस्थमिपां तान्तन्तामः'[17] इत्यनेन थसः स्थाने तमादेशो भवति। एवञ्च 'तास्यनुदात्तेन्ङिदुपदेशात्॰'[18] इत्यनेन तमः अकारः अनुदात्तो भवति। 'उदात्तादनुदात्तस्य स्वरितः'[19] इत्यनेन उदात्ताकारपरे अर्थात् यकारोत्तरवर्त्ति-उदात्ताकारपरे तकारोत्तरवर्त्ति-अनुदात्ताकारः स्वरितो भवति। 'अनुदात्तं पदमेकवर्जम्' इत्यनेन यकारोत्तरवर्त्यकारम् उदात्तं वर्जयित्वा शेषनिघातो भवति। निघातो नाम अनुदात्तो भवति। एवं रूपेण 'गोपायतं नः' इत्यत्र स्वरविधानं क्रियते।

**4. स्वराणां प्रयोजनम् –** मन्त्राणां स्वेच्छया अर्थकरणाद्वारणाय केचन उपायाः ऋषिभिः प्रकल्पिताः। तत्र एकः उपायः अस्ति – स्वरविधानम्। अनेन अद्यावधि एकमप्यक्षरं स्खलितं नाभूत्। अद्यापि मन्त्राणां सस्वरोच्चारणं विशुद्धतया श्रूयते। संस्कृतवाङ्मये प्रयुक्तैकशब्दस्यापि बह्वर्थाः भवन्ति अस्यां स्थितौ प्रयुक्तशब्दस्यार्थनिश्चये उपकारको भवति स्वरः। एवञ्च स्वरैः पदार्थस्य, समासार्थस्य, वाक्यार्थस्य च प्रतिपत्तिः अनवच्छेदतया जायते।

**4.1 पदार्थबोधः –** पदार्थबोधाय स्वरज्ञानमत्यन्तमावश्यकं वर्त्तते। यथा – गम्धातोः तृच्प्रत्यये सति 'चितः'[20] इत्यनेन सूत्रेण अन्तोदात्तत्वं विधीयते। तृन्प्रत्यये सति 'ञ्नित्यादिर्नित्यम्'[21] इत्यनेन नित्वात् आद्युदात्तत्वञ्च विधीयते। अत्र प्रसिद्धोऽस्ति – 'उदात्तानुदात्तयोः उदात्तस्यैव प्राधान्यमि'ति अनेन न्यायेन तृच्प्रत्यये सति गन्ता इत्यस्य क्रियाकर्त्तुः प्राधान्यं भवति। तृन्प्रत्यये च सति गन्ता इति धात्वर्थस्य प्रामुख्यं भजते। तदेवोक्तं वेङ्कटमाधवाः –

तृन्तृचोश्चार्थभेदोऽयं प्रकृत्यर्थः स्फुटस्तृनि।
तृचि स्फुटः प्रत्ययार्थः प्रकृत्यर्थोपसर्जनः॥

**4.2 समासार्थबोधः –** समासार्थबोधे स्वराणां भूमिका विशिष्टतया वरीवर्त्ति। यथा – 'स्थूलपृषतीमनड्वाहीमाभेत' इति मन्त्रे 'स्थूलपृषतीम्' इति पदार्थज्ञानाय समासनिश्चयः कर्त्तव्यः। अत्र समासार्थप्रतिपत्तिः स्वरैः एव भवति। अत्र कर्मधारयपक्षे पृषतीशब्देन मत्वर्थलक्षणया पृषत्वती अर्थात् बिन्दुमती गौरेवाभिधीयते। एवञ्च स्थूला चासौ पृषती चेति स्थूलपृषतीत्यत्र स्थूलाऽपि गौरेव भवति। अर्थात् बिन्दवः स्थूलाः कृशाः वा स्युः किन्तु गौः स्थूला एव इष्यते। एवञ्च बहुव्रीहिपक्षे स्थूलानि पृषन्ति यस्याः सेति स्थूलपृषतीति अर्थात् पृषत्सु स्थौल्यमेव स्यात्, गौस्तु स्थूला कृशा वेत्यत्रानादरः। अत्र मन्त्रे कः पदार्थः उक्तः इति स्वरेण निश्चिनोति। स्थूलपृषतीत्यत्र अन्तोदात्तत्वे[22] सति तत्पुरुषसमासः, आद्युदात्तत्वे[23] च सति बहुव्रीहिसमासो भवति। तथैव अन्यदपि श्रूयते –

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्[24]॥ इति।

---

[12] सिद्धान्तकौमुद्यां वैदिकप्रकणे सामान्यस्वरप्रकणे पृ॰स॰ 439

[13] अष्टाध्याय्याम् 3-1-68

[14] तत्रैव

[15] तत्रैव, 6-1-97

[16] तत्रैव, 8-2-5

[17] तत्रैव, 3-4-101

[18] तत्रैव, 6-1-186

[19] तत्रैव, 8-4-66

[20] तत्रैव, 6-1-163

[21] तत्रैव, 6-1-197

[22] अष्टाध्यायां **समासस्य** (6-1-223) इत्यनेन सूत्रेण अन्तोदात्तत्वं विधीयते।

[23] बहुव्रीहौ प्रकृत्या पूर्वपदम्

[24] महाभाष्ये पृ॰स॰ – 08

अत्र इन्द्रशत्रुः इत्यस्मिन् पदे स्वरवैकल्यात् अनर्थमभूत्।

**4.3 वाक्यार्थबोधः** – वाक्यार्थबोधाय स्वरज्ञानमावश्यकम्। वाक्ये यदि क्रिया उदात्तयुक्ता तदा क्रियायाः, सुबन्तः उदात्तयुतश्चेत् सुबन्तपदस्य प्रधानता दृश्यते। उक्तञ्च –

एवं पदे समासे च यत्रोदात्तो व्यवस्थितः।
वर्णे पदे वा तत्रापि काकुरस्तीति निश्चयः॥ इति।

**4.4 अदृष्टसिद्धिः** – इयं स्वराणां विलक्षणं प्रयोजनमस्ति। यदि वेदपाठी सस्वरोच्चारणं शुद्धतया करोति चेत् ऐहिक्या सह आमुष्मिकसिद्धिरपि तस्य अवश्यं भवति। अदृष्टसिद्धये स्वराः सुतरामावश्यकाः। श्रूयते च –

हस्तहीनन्तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुस्सामभिर्दग्धो वियोनिमधिगच्छति॥

**5. उपसंहारः** – महाभाष्ये भगवत्पादैः उक्तम् –

'उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः[25]॥'
'यदधीतमविज्ञातमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्[26]॥'

एवं निरुक्तेऽपि प्रोक्तं यास्केन –

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥

इत्यादि श्रुतिस्मृतिवचनैः प्रतिपादितरीत्या मन्त्राणां निष्प्रयोजनत्ववारणाय अर्थात् अर्थाभिव्य-क्त्यभाववारणाय अपि च अनर्थत्वनिवारणाय उपकारकस्वराणामाधुनिकसमाजे समुचितमर्यादा-नुकूलितार्थवेदार्थप्रतिपत्तये अत्यन्तं महत्त्वं वरीवर्त्ति। किन्तु अद्यत्वे स्वरज्ञाः अङ्गुलिगण्याः एव सन्तीति महान् क्लेदस्य विषयोऽयम्। अस्माभिः वैयाकरणैः वेदविज्ञैश्च अवश्यमस्यां दिशि प्रयासः विधेयः।

**सहायकग्रन्थसूची**

1. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः – श्री प॰ ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, 2005
2. वैदिकवाङ्मयस्येतिहासः, डॉ॰जगदीशचन्द्रमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, 2009
3. शुक्लयजुर्वेदप्रातिशाख्यम्, डॉ॰ वीरेन्द्रकुमारवर्मा, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, प्रथमसंस्करणम्, 2010
4. यास्कप्रणीतं निरुक्तम् (निघण्टुसहितम्), प॰ सीतारामशास्त्री, परिमलपब्लिकेशन्स, दिल्ली, षष्ठसंस्करणम्, 2014
5. ऋग्वेदभाष्यभूमिका हिन्दीव्याख्योपेता, प॰ श्रीजगन्नाथपाठकः, चौखम्बविद्याभवनम्, वाराणसी, सप्तमसंस्करणम्, 1995
6. माध्यन्दिनशतपथब्राह्मणम्, प्रो॰ युगलकिशोरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्, 2004
7. आधुनिक भाषा विज्ञान एवं हिन्दी भाषा संवर्धन, डॉ॰ पीताम्बर, नीलम प्रकाशन, आगरा, प्रथमसंस्करणम्, 1990
8. आधुनिक भाषाशास्त्र सिद्धान्तालु, डॉ॰ पी॰ एस॰ सुब्रह्मण्यम्, पद्मश्री ग्राफिक्स, गान्धीनगर, हैदराबाद, प्रथमसंस्करणम्, 1997
9. भाषातत्त्वदीपिका, श्रीहरिगोपालोपाध्याय, नवलकिशोर प्रेस, लखनऊ, 1881
10. भाषालोचन, पण्डितप्रवर आचार्य श्रीसीताराम चतुर्वेदी, हिन्दी साहित्य कुटीर, बनारस, 1954
11. संस्कृत व्याकरण की उपक्रमणिका, श्री ईश्वरचन्द्र विद्यासागर, श्रीलक्ष्मीनारायण प्रेस, बनारस, 1931
12. संस्कृत शास्त्रों का इतिहास, आचार्य बलदेव उपाध्याय, नया संसार प्रेस, वाराणसी, प्रथमसंस्करणम्, 1969
13. संस्कृतव्याकरण संग्रहमु, साहिति सदन, तिरुपति, 1976
14. व्याकरण-महाभाष्य (प्रथम आह्निकत्रय), अनुवादकः चारुदेव शास्त्री, मोतीलाल बनारसीदास, देहली, प्रथमसंस्करणम्, 1962

[25] महाभाष्ये पृ॰स॰ 13

[26] महाभाष्ये पृ॰स॰ 08